## पञ्चमः पाठः

# भोजस्य शल्यचिकित्सा

*[ प्रस्तुत पाठ **'भोजप्रबन्ध'** से लिया गया है, जिसकी रचना 16वीं शती में **बल्लालसेन** ने की थी। यह ग्रन्थ काव्यत्व की दृष्टि से अत्यन्त श्रेष्ठ है। इस ग्रन्थ में संस्कृत के सभी प्रसिद्ध कवियों को भोज की सभा में एकत्र कर दिया गया है। इस ग्रन्थ में वर्णित कथाओं में कवि-कौशल देखते ही बनता है। प्रस्तुत कथा में राजा भोज की 'मस्तिष्क शल्यचिकित्सा' का परिचय दिया गया है। अध्येताओं को इस कथा से कवि बल्लाल की शैली का समुचित रूप में परिचय मिलता है। कहीं वे महाकवि बाण से प्रभावित होकर लम्बे समासों और कठिन शब्दों का प्रयोग करते हैं, तो कहीं अति सरल छोटे-छोटे वाक्यों से अभीष्ट की प्रस्तुति करते हैं। प्रस्तुत कथा में बल्लाल ने महाकवि कालिदास को भी पात्र रूप में प्रस्तुत किया है। इस कथा से ज्ञात होता है कि पहले भी इस देश में शल्य-चिकित्सा का प्रचलन था।]*

अथ कदाचिद् भोजो नगराद् बहिः निर्गतः। नूतनेन तटाकाम्भसा बाल्यसाधितकपालशोधनादिं चकार। तन्मूलेन कश्चन शफरशावः कपालं प्रविष्टो विकटकरोटिकानिकटघटितो विनिर्गतः। ततो राजा स्वपुरीमवाप। तदारभ्य राज्ञः कपाले वेदना जाता। ततस्तत्रत्यैर्भिषग्वरैः सम्यक् चिकित्सितापि न शान्ता। एवमहर्निशं नितरामस्वस्थे राज्ञयमानुषविदितेन महारोगेण।

एवमतीते संवत्सरेऽपि काले न केनापि निवारितः तद्गदः। ततः श्रीभोजो नानाविधसमनौषध-ग्रसनरोगदुःखितमनास्समीपस्थं शोकसागरनिमग्नं बुद्धिसागरं कथमपि सम्मताक्षरामुवाच वाचम्। बुद्धिसागरः इतः परमस्मद्! विषये न कोऽपि भिषग्वरो वसतिमातनोतु। बाध्वटादिभेषजकोषान् निखिलान् स्रोतसि निरस्यागच्छ। मम देवसमागमसमयः समागतः इति। तच्छ्रुत्वा सर्वेऽपि पौरजनाः कवयश्चावरोधसमाजाश्च विगलदस्रासारनयना बभूवुः। ततः कदाचिद्देवसभायां पुरन्दरः सकलमुनिवृन्दमध्यस्थं वीणामुनिमाह। मुने! इदानीं भूलोके का नाम वार्तेति। ततो नारदः प्राह– सुरनाथ! किमप्याश्चर्यं किन्तु धारानगरवासी श्री भोजभूपालरोगपीडितो नितरामस्वस्थो वर्तते। स तस्य रोगः केनापि न निवारितः। तदनेन भोजनृपालेन भिषग्वरः अपि स्वदेशान्निष्कासिताः। वैद्यशास्त्रमप्य-नृतं इतिनिरस्तमिति एकदाकर्ण्य पुरुहूतः समीपस्थौ नासत्याविदमाह। भोः स्ववैंद्यौ! कथमनृतं धन्वतरीयं शास्त्रं?

तदा तावाहतुः– अमरेश! देव न व्यलीकमिदं शास्त्रं किंत्वमरविदितेन रोगेण बाध्यतेऽसौ भोजः इति। इन्द्रः– कोऽसौ अवार्यरोगः? किं भवतोर्विदितः? ततस्तावूचतुः– देव! कपालशोधनेकृते भोजेन तदा प्रविष्टः पाठीनः तन्मूलोऽयं रोग इति। तदा इन्द्रः स्मयमानमुखः प्राह– तदिदानीमेव युवाभ्यां गन्तव्यम्। न चेदितः परं भूलोके भिषक्शास्त्रस्यासिद्धिः भवेत्। न खलु सरस्वतीविलासस्यनिकेतनं शास्त्राणामुद्धर्ता चेति। ततः सुरेन्द्रादेशेन तौ उभावपि धृतद्विजन्मवेषौ धारानगरं प्राप्य द्वारस्थं प्राहतुः। द्वारस्थ आवां भिषजौ काशीदेशादागतौ श्रीभोजाय विज्ञापय तेनानृतमित्यङ्गीकृतं वैद्यशास्त्रमिति श्रुत्वा तत्प्रतिष्ठापनाय तद्रोगनिवारणाय चेति। ततो द्वारस्थः प्राह– भो विप्रौ! न कोऽपि भिषक्प्रवरः प्रवेष्टव्यः इति राज्ञोक्तम्। राजा तु केवलमस्वस्थो नायमवसरोविज्ञापनस्येति। तस्मिन्क्षणे कार्यवशाद् बहिर्निर्गतः बुद्धिसागरस्तौ दृष्ट्वा कौ भवतौ? इति अपृच्छत्। ततस्तौ यथागतमूचतुः। ततोबुद्धिसागरेण तौ राज्ञः समीपं नीतौ। ततो राजा तौ अवलोक्य मुखश्रिया अमानुषाविति बुद्ध्वा आभ्यां शक्यतायं रोगो निवारितुमिति निश्चित्य तौ बहु मानितवान् ततस्तावूचतुः। राजन्न भेतव्यं रोगो निर्गतः। किंतु कुत्रचिदेकान्ते त्वया भवितव्यमिति। ततो राज्ञापि तथाकृतम्। ततस्तावपि राजानं मोहचूर्णेन मोहयित्वा शिरः कपालमादाय तत्करोटिकापुटे स्थितं शफरकुलं गृहीत्वा कस्मिश्चिद्भाजने निक्षिप्य संधानकरण्या कपालं यथावदारचय्य संजीविन्या च तं जीवयित्वा तस्मै तददर्शयताम्। तदा तद्दृष्ट्वा राजा विस्मितः किमेतदिति तौ पृष्टवान्। तदा तावूचतुः। राजन्! त्वया बाल्यादारभ्य परिचितकपालशोधनतः सम्प्राप्तमिति। ततो राजा तावश्विनौ मत्वा तच्छोधनार्थमपृच्छत्। किमस्माकं पथ्यमिति? ततस्तावूचतुः– अशीतेनाम्भसा स्नानं पयः पानं वरास्त्रियः एतद्वो मानुषापथ्यमिति।

तत्रान्तरे राजा मध्येमानुषा इति सम्बोधनं श्रुत्वा वयं चेन्मानुषा कौ युवामिति तयोर्हस्तौ झटिति स्वहस्ताभ्यामग्रहीत्। ततस्तत्क्षणमेव तावन्तर्धत्तां ब्रुवतावेव कालिदासेन पूरणीयं तुरीञ्य चरणमिति ततो राजा विस्मितः सर्वानाहूय तद्वृत्तमब्रवीत्। तच्छ्रुत्वा सर्वेऽपि चमत्कृता बभूवुः।

तत्कालिदासेन तुरीयचरणं पूरितम्–

"स्निग्धमुष्णञ्च भोजनम्" इति।

ततो भोजोऽपि कालिदासं लीलामानुषं मत्वा परं सम्मानितवान्।

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–
(क) राजा भोजः कः आसीत्?
अथवाभोजः कः आसीत्? **(2018HQ, 20MP)**
(ख) द्वारस्थोः भिषजौ किमाहुः?
(ग) सः कुत्र अगच्छत्?
(घ) भोजस्य मन्त्री कः आसीत्?
(ङ) राजा बुद्धिसागरं किमकथयत्?
(च) मानुषां पथ्यं किमस्ति?
(छ) भोजस्य चिकित्सा काभ्यां कृता च कुतः तौ समागतौ?
(ज) श्लोकस्य तुरीयम् चरणं केन पूरितम्? **(2020MR)**
(झ) राज्ञः कपाले वेदना किमर्थम् जाता?
(ञ) पुरन्दरः नारदं किमाह?
(ट) भोजस्य कस्मिन् स्थाने वेदना जाता? **(2018HT, 20MO)**
(ठ) भोजः कालिदासं किं मत्वा परं सम्मानितवान्?
(ड) भोजः कस्याः नगर्य्याः नृपः आसीत्?
अथवाभोजः कस्याः नगर्याः राजा आसीत्? **(2019AO, 20MQ)**
(ढ) भोज प्रबन्धस्य प्रणेता कः आसीत्? **(2019AS, AT, AU)**
अथवाभोज प्रबन्धस्य रचयिता कः?
2. 'भोजस्य शल्यचिकित्सा' पाठ का सारांश लिखिए। **(2019AR, 20MS)**
3. 'भोजस्य शल्यचिकित्सा' पाठ के आधार पर राजा भोज का चरित्र-चित्रण कीजिए। **(2018HR, 20MU)**
4. वैद्य अश्विनीकुमारों ने राजा भोज की मस्तिष्क-शल्यचिकित्सा किस प्रकार की?

# वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **भोजः ................ नृपः आसीत्।** **(2019AS)**
(क) धारा नगर्याः (ख) मथुरा नगर्याः (ग) काशी नगर्याः (घ) गया नगर्याः
2. **भोजस्य चिकित्सा केन कविना कृता–**
(क) अश्विनी कुमारभ्यां (ख) अतुल वैद्येन (ग) चरकेन (घ) सुश्रुतेन
3. **भोजस्य कस्मिन् अंगे वेदना जाता?**
अथवा **भोजस्य ................... वेदना जाता।**
(क) कपाले (ख) उदरे (ग) वक्षस्थले (घ) हृदये
4. **बुद्धिसागरः भोजस्य आसीत्–**
(क) मंत्री (ख) द्वारपालः (ग) रक्षकः (घ) मित्रः
5. **भोजस्य चिकित्सकः ........... आसीत्।**
(क) चरकः (ख) अश्विनी कुमारः (ग) धन्वन्तरिः (घ) हरिहरः
6. **भोज प्रबन्धस्य रचयिता ........... अस्ति।**
(क) बल्लालसेनः (ख) भोजः (ग) कालिदासः (घ) विद्यापतिः
7. **अथ कदाचित् ........... नगराद् बहिः निर्गतः।**
(क) भोजो (ख) श्रीहर्षो (ग) जानको (घ) शिववीरः

## ➡ आन्तरिक मूल्यांकन

राजा भोज के बारे में जानकारी प्राप्त कर सौ शब्दों में लिखें।

●